**CLASS : 12th** (Sr. Secondary) **Code No. 205**

**Series : SS/Annual-2023**

*रोल नं०* | | | | | | | | | | |

***SET : C***

# संस्कृत

## SANSKRIT

***ACADEMIC/OPEN***

(Only for Fresh/Re-appear/Improvement/Additional Candidates)

*समय : **3** घंटे]* *[पूर्णांक : **80***

- *कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **8** तथा प्रश्न **15** हैं।*
- *प्रश्न-पत्र में दाहिने हाथ की ओर दिये गये **कोड नम्बर** तथा **सेट** को छात्र उत्तर-पुस्तिका के मुख्य-पृष्ठ पर लिखें।*
- *कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें।*
- *उत्तर-पुस्तिका के बीच में खाली पन्ना/पन्ने न छोड़ें।*
- *उत्तर-पुस्तिका के अतिरिक्त कोई अन्य शीट नहीं मिलेगी। अतः आवश्यकतानुसार ही लिखें और लिखा उत्तर न काटें।*
- *परीक्षार्थी अपना रोल नं० प्रश्न-पत्र पर अवश्य लिखें। रोल नं० के अतिरिक्त प्रश्न-पत्र पर अन्य कुछ भी न लिखें और वैकल्पिक प्रश्नों के उत्तरों पर किसी प्रकार का निशान न लगाएँ।*
- *कृपया प्रश्नों के उत्तर देने से पूर्व यह सुनिश्चित कर लें कि प्रश्न-पत्र पूर्ण व सही है, **परीक्षा के उपरान्त इस सम्बन्ध में कोई भी दावा स्वीकार नहीं किया जायेगा।***

***सामान्य निर्देश :***

*(i)* *प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।*

*(ii)* *प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।*

*(iii)* *श्रेष्ठाङ्कान् प्राप्तये सुवाच्यलेखोऽपेक्ष्यते।*

**खण्डः – 'क'**

**(अपठित-अवबोधनम्)**

**1.** अधोलिखितं गद्यांशं पठित्वा निम्नांकितप्रश्नानाम् उत्तराणि संस्कृतपूर्णवाक्येन लिखत –

एकदा महर्षिः गौतमः बाणविद्यायाः अभ्यासं कर्तुम् उद्यतोऽभवत्। तस्य पत्नी अहिल्या दूरं गतान् बाणान् सञ्चित्य, आनीय च तस्मै ददाति स्म। एकवारं सा विलम्बेन प्रत्यागतवती। तीव्रातपे तस्याः चरणे तप्ते जाते आस्ताम्। विश्रामार्थं सा वृक्षच्छायायाम् उपविष्टवती। महर्षिः सूर्यदेवस्योपरि क्रुद्धः जातः। सूर्यः ब्राह्मणवेषत्वेन समागत्य तस्मै छत्रं पादत्राणे च अददात्। एतत् उपकरणद्वयं तदारभ्य हि लोके प्रचलितं वर्तते।

*प्रश्ना :-* $5 \times 2 = 10$

(क) महर्षिः गौतमः किं कर्तुम् उद्यतोऽभवत् ?

(ख) महर्षेः पत्न्याः किं नाम आसीत् ?

(ग) महर्षिः कस्योपरि रुष्टोऽभवत् ?

(घ) किमर्थं अहिल्या वृक्षच्छायायाम् उपविष्टवती ?

(ङ) 'जातः' इत्यत्र कः धातुः कश्च प्रत्ययः ?

**खण्डः – 'ख'**

**(रचनात्मकं-कार्यम्)**

**2.** ***एकं*** लघुनिबन्धं संस्कृतभाषया रचयत – 6

(क) मम प्रियं पुस्तकम्

(ख) समयस्य सदुपयोगः

(ग) स्वामी विवेकानन्दः

## खण्डः – 'ग'

## (संस्कृत-साहित्य-परिचयः)

**3.** कविकालिदास्य ***अथवा*** पं० हृषीकेशभट्टाचार्यस्य संक्षिप्तपरिचयं हिन्दीभाषया लिखत। 4

**4.** समुद्रसंगमस्य ***अथवा*** उत्तररामचरितस्य संक्षिप्तपरिचयं हिन्दीभाषया लिखत। 4

## खण्डः – 'घ'

## (छन्दोऽलङ्कार-परिचयः)

**5.** प्रदत्तछन्दस्सु ***द्वयोः*** संस्कृतभाषया लक्षणम् उदाहरणं च लिखत – $2 \times 4 = 8$

(i) उपजातिः

(ii) अनुष्टुप्

(iii) मन्दाक्रान्ता

(iv) शार्दूलविक्रीडितम्

**6.** प्रदत्त-अलंकारेषु ***द्वयोः*** संस्कृतभाषया लक्षणम् उदाहरणं च लिखत – $2 \times 4 = 8$

(i) उपमा

(ii) यमकम्

(iii) अनुप्रासः

(iv) व्याजस्तुतिः

**खण्डः – 'ङ'**

**(अनुप्रयुक्त-व्याकरणम्)**

**7.** (क) करणकारकस्य ***अथवा*** अधिकरणकारकस्य परिभाषां सोदाहरणं हिन्दीभाषया लिखत। 2

(ख) गुणसन्धेः ***अथवा*** व्यञ्जनसन्धेः परिभाषां सोदाहरणं हिन्दीभाषया लिखत। 2

(ग) तत्पुरुषस्य ***अथवा*** द्विगुसमासस्य परिभाषां सोदाहरणं हिन्दीभाषया लिखत। 2

**खण्डः – 'च'**

**(पठित-अवबोधनम्)**

**8.** अधोलिखितगद्यांशस्य सप्रसंगं सरलार्थं लिखत – 4

(क) अहो, न केवलं मांसलोज्ज्वलेन देहबन्धेन, कलहंसघोष-घर्घरानुनादिना स्वरेण च रामभद्रमनुसरति।

**अथवा**

(ख) भवा दृशा एव भवन्ति भाजनान्युपदेशानाम्।

अपगतभले हि मनसि विशन्ति सुखेनोपदेशगुणाः।

**9.** प्रदत्तश्लोकस्य सप्रसंगं सरलार्थं लिखत – 4

(क) पापान्निवारयति योजयते हिताय,
गुह्यं निगूहति गुणान् प्रकटीकरोति
आपद्गतं च न जहाति ददाति काले,
सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः।।

**अथवा**

(ख) ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्।
तेन त्यक्तेन भुञ्जीथाः मा गृधः कस्यस्विद्धनम्।।

**10.** प्रदत्तसूक्तिषु ***द्वयोः*** भावार्थं हिन्दीभाषया लिखत - $2 \times 2 = 4$

(क) असारोऽयं संसारः।

(ख) विभूषणं मौनमपण्डितानाम्।

(ग) मनुष्याणां हिंसावृत्तिस्तु निरवधिः।

(घ) योगः कर्मसु कौशलम्।

**11.** प्रदत्तगद्यांशं पठित्वा अधः प्रदत्तप्रश्नानामुत्तराणि संस्कृतभाषया लिखत - $2 \times 1 = 2$

एतेषां सप्तद्वीपानां प्रत्येकमावेष्टनरूपाः सप्तसमुद्राः। लवणो जम्बुद्वीपस्यावरकः। इक्षुरसः प्लक्षद्वीपस्य, दधिसमुद्रः क्रौञ्चद्वीपस्य, क्षीरसमुद्रः शाकद्वीपस्य, स्वादुजलसमुद्रः पुष्करद्वीपस्यावरकः इति।

***प्रश्नौ :-***

(क) शाकद्वीपस्य आवरकः कः ?

(ख) समुद्राः कति सन्ति ?

**12.** प्रदत्तश्लोकं पठित्वा अधः प्रदत्तप्रश्नानामुत्तराणि संस्कृतभाषया लिखत - $2 \times 1 = 2$

न हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत्।

कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः।

***प्रश्नौ :-***

(क) किं कश्चित् अकर्मकृत् तिष्ठति ?

(ख) 'गुणैः' इत्यत्र का विभक्तिः किं वचनं च ?

**13.** रेखांकितपदम् आधृत्य प्रश्ननिर्माणं कुरुत - $2 \times 1 = 2$

(क) जगाद भूयो जगदेकनाथः।

(ख) राजवचनमनुगच्छति जनो भयात्।

**खण्डः – 'छ'**

**(लघूत्तरात्मकप्रश्नाः)**

**14.** मञ्जूषागतं पदम् आधृत्य वाक्यं पूरयत - $4 \times 1 = 4$

(i) .......... उभयतः वृक्षाः सन्ति। (ग्रामं/ग्रामात्)

(ii) .......... नमः। (सर्वान्/सर्वेभ्यः)

(iii) सः .......... विना गृहं न गच्छति। (तम्/तस्य)

(iv) मोहनः गृहं ........... गच्छति। (प्रति/प्रतिम्)

**खण्डः – 'ज'**

**(बहुविकल्पीयप्रश्नाः)**

**15.** प्रदत्तविकल्पेषु ***शुद्धम्*** उत्तरं चीयताम् - $12 \times 1 = 12$

(क) 'जिजीविषेच्छतम्' इत्यस्य सन्धिच्छेदः अस्ति -

(i) जिजीविषेत् + शतम् (ii) जिजीविषा + छतम्

(iii) जिजीविषेत् + छतम् (iv) जिजीविषा + शतम्

(ख) 'एव + अतिगहनम्' इत्यत्र सन्धिपदं भवति -

(i) एवातिगहनम् (ii) एवतिगहनम्

(iii) एतिगहनम् (iv) एवैतिगहनम्

(ग) 'कः + अपि' इत्यस्य सन्धिपदं किम् ?

(i) कोऽपि (ii) केऽपि

(iii) कापि (iv) कसपि

(घ) 'अभिरुचिर्व्यसनम्' इत्यस्य विच्छेदः भवति –

(i) अभिरुचिः + व्यसनम् (ii) अभिरुचेः + व्यसनम्

(iii) अभिरुचिम् + व्यसनम् (iv) अभिरुचिं + व्यसनम्

(ङ) 'समाप्तविद्यः' इत्यस्य विग्रहवाक्यं भवति –

(i) समाप्तः विद्यः येन सः (ii) समाप्ता विद्या येन सः

(iii) समाप्तं विद्यां येन सः (iv) समाप्ता विद्यः येन सः

(च) 'महान्तः पादपाः' इत्यत्र समस्तपदं भवति –

(i) महापादपाः (ii) माहपादपाः

(iii) महपादपाः (iv) मोहपादपाः

(छ) 'न प्रतिहता' इत्यस्य समस्तपदं किम् ?

(i) अप्रतिहता (ii) अप्रतिहताः

(iii) अप्रतिहतः (iv) अनप्रतिहता

(ज) 'वाक्पटुता' इत्यस्य विग्रहवाक्यं भवति –

(i) वाचि पटुता (ii) वाचा पटुता

(iii) वाचे पटुता (iv) वाचं पटुता

(झ) 'सम् + चि + ल्यप्' योगेन रूपं भवति -

(i) सञ्चित्य (ii) समचित्य

(iii) समचीय (iv) सञ्चीय

(ञ) 'पश्यन्' इत्यत्र प्रकृतिप्रत्ययौ स्तः -

(i) पश्य् + शतृ (ii) पश्य् + अन्

(iii) दृश् + शतृ (iv) दृश् + अन्

(ट) 'दैष्टिक + तल्' इत्यस्य योगेन रूपं भवति -

(i) दैष्टिकतम् (ii) दैष्टिकतः

(iii) दैष्टिकता (iv) दैष्टिकम्

(ठ) 'ततः' इत्यस्य प्रकृतिप्रत्ययौ स्तः -

(i) तद् + तसिल् (ii) तद् + अस्

(iii) तद् + असुन् (iv) तद् + क्त